श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमहालक्ष्म्यै नमः

श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ नामवैभवस्तबकः सप्तदशः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ नामवैभवस्तबकः सप्तदशः ॥

धाम्ना दृश्येय राजीवधाम्ना तेन दयालुना।
आम्नानं जातुचिद्यस्य नाम्नां ज्ञानैर्युनक्ति नः ॥ 17.1 ॥

अर्णवेन्द्रतनयेऽतिदुःसहैः
दुर्नरेशगुणवर्णनातपैः।
आर्तया रसनयाऽद्य शीतलं
कीर्तयामि तव नाम केवलम् ॥ 17.2 ॥

राजीवगेहे तव मर्त्यराजी -
राजीवयन्ति व्यसनाग्निमग्नाः।
नामानि यः कीर्तयते स धन्यो
वैमानिकानामपि माननीयः ॥ 17.3 ॥

पञ्चेषुचापल पलायनसिद्धमन्त्रं
घण्टाविशेषनिनदं कुहनापिशाच्याः।
कोपानलप्रशमसान्त्ववचो मुरारेः
के नाम नाम न जपन्ति तवाब्धिकन्ये ॥ 17.4 ॥

आम्नायदुग्धजलधेरमृतं मदम्ब
नित्यद्विषां प्रहरणे द्रुहिणास्त्रमन्त्रः।
नारायणस्य किल नित्यजपस्त्वदीयं
नाम प्रगल्भतममभ्युदयं तनोतु ॥ 17.5 ॥

नामरक्षणपरस्तवोचितं
    नामरक्षणमपेक्षते रमे।
यस्तनोति तव नामयोजनं
    सोऽयमद्भुतमनामयो जनः॥ **17.6**॥

साम्नां जन्मान्तरमखिलऋग्वर्गसर्गान्तरं वा
    पर्यायो वा सकलयजुषां प्रक्रियाथर्वणानाम्।
वेदान्तानां किमु विनिमयो विश्रुतं विश्वमातः
    दिव्यं भव्यं दिशति जपतां देवि नाम त्वदीयम्॥ **17.7**॥

त्रय्यन्तैकप्रणयिमनसस्तापसाः पापसार्थ -
    प्रत्यादेशप्रमुदितमहाचेतसः स्फीतसत्त्वाः।
नाम श्रीमत्तव किल वलत्कीर्तयः कीर्तयन्तः
    मातर्मुक्तौ विहितकुतुका मोदयन्ते प्रियं ते॥ **17.8**॥

भास्वद्वर्णं वृषगिरिपतेर्भावुकं तन्वता ते
    धाम्ना धाम स्फुरति जलधेः पुत्रि नाम्ना च नाम।
रम्यं हर्म्यस्थलमपि महीरक्षिणः शैलतुङ्गं
    दीपारोपं रजनिषु विना देवि देदीप्यते किम्॥ **17.9**॥

अप्यस्माकं वचनमचमत्कारि कंसारिकान्ते
    प्राज्ञास्वाद्यं भवति भवतीनामधेयानुषङ्गात्।
कर्पूरादिस्थिरपरिमल द्रव्यसाचिव्यभूम्ना
    निर्गन्धे स्यादपि सुरभिता निम्बकाष्ठस्य चूर्णे॥ **17.10**॥

अम्बा लक्ष्मीरमृतसहभूरब्धिराजन्यकन्या
    पद्मा विश्वम्भरसहचरी पद्मसद्मा रमेति।
यो नामैवं पिबति भवती नामनामामृतौघं
    तस्यैवाहुर्जननि सुलभां संसृतिश्रान्ति शान्तिम्॥ **17.11**॥

न मुहुर्बहु मन्महे मनून्
    न च वाचो जरतीरधीमहे।
प्रयताः प्रयतामहे वयं
    तव नाम्नां हरिपत्नि कीर्तने ॥ **17.12** ॥

अनिरास्यमधोक्षजप्रिये
    भवरोगं बहुलङ्घनैरपि।
तरितुं प्रभवन्ति लीलया
    तव नामौषधसेविनो जनाः ॥ **17.13** ॥

न हि नन्तुमनन्तमीश्महे
    न च निर्माणकथाऽपि कर्मणाम्।
कमले कलिभीनिवर्तनं
    कलयामस्तव नामकीर्तनम् ॥ **17.14** ॥

विविधानि तवाधुना तु नाम
    व्यसनान्यब्धिसुते धुनातु नाम।
अपि यज्जपतः कलावहानि
    स्युरमून्युज्ज्वलधी कलावहानि ॥ **17.15** ॥

राष्ट्रप्रसङ्ग कुजनस्तुतिराजकार्य -
    दुस्तर्कवाद परदूषणदोषशान्त्यै।
नारायणप्रियतमे ननु पावनानि
    नामानि कीर्तयतु ते रसना मदीया ॥ **17.16** ॥

प्रादेशसंमितनिजोदरपूरणार्थैः
    अत्यर्थमेभिरनृतैरभिदह्यमाना।
निर्वातु नीरधिसुते रसना त्वदीयैः
    आख्याशतैरभिमतैरमृतैरिवासौ ॥ **17.17** ॥

अगतिकदेहिदेहि वचनश्रुतिदुःखदशा -
कुपितमितम्पचस्तवनदुष्कृति निष्कृतयः।
भवदभिधासुधा भवदवानलतापमुषः
जननि पुनः पुनः परिपुनन्ति जगन्ति रमे॥ **17.18** ॥

श्रुतिफणितिस्थिति स्मृतिपुराणततिश्रवणे
भगवति मादृशां जगति न प्रतिभाति गतिः।
तदपि तव त्वदीयदयितस्य च नामजपः
जयति कलौ युगे जडधियामपि कामदुघः॥ **17.19** ॥

मनसिजतातपादमनसः परितुष्टिकरं
जननि समानमेव ननु साम च नाम च ते।
अतिशयमादिमादपरमेव तथाऽप्ययते
निधनमुपद्रवं च न कदाऽपि यतः सहते॥ **17.20** ॥

पापाटोपनिदाघवर्जनकृते पर्जन्यगर्जायते
व्याधिव्यालकुले पतत्पतिगरुद्वातूलनादायते।
दारिद्र्यद्विरदेन्द्रवारणविधौ सिंहाट्टहासायते
पद्मे तावकनाम संसृतिनिशि प्रत्यूषकालायते॥ **17.21** ॥

राजीवायतनेति दैत्यजिदुरोरक्षेति लक्ष्मीरिति
क्षीराब्धेर्दुहितेति कैटभरिपोर्दारा इति श्रीरिति।
श्रेयः साधनदेवतेति जगतां मातेति सीतेति च
प्रातर्मातरुपास्महे कृतशुभस्थेमानि नामानि ते॥ **17.22** ॥

अञ्चत्पञ्चषवर्णमर्णवसुते त्वन्नामकर्णामृतं
मत्पापानि महत्तराण्यपि मुहुर्मुष्णाति कृष्णाङ्गने।
अक्षीणि प्रतिरुन्धदन्धतमसं गेहेषु भूयिष्ठम -
प्यङ्गुष्ठप्रमितैव दीपकलिका हा हन्त नो हन्ति किम्॥ **17.23** ॥

अवितुमुदधिकन्यकेऽचिकित्स्यान्
    मरणजरादिमयान्महामयान्माम्।
परमविषममान्तरं कषायं
    पचति शुचिर्भवदीयनामवर्गः॥ **17.24** ॥

कृतशुभतति धारितं कृतार्थैः
    भगवति भोग्यमतीव पावनं च।
अभिदधति सुवर्णमात्मवन्तः
    प्रशमितदुर्गति नाम तावकीनम्॥ **17.25** ॥

हरिसखि तव धूतक्लेशभूमानि नामा -
    न्यहरहरहमुद्यद्भक्तिराकर्ण्य धन्यः।
जहि दलय बधान च्छिन्धि भिन्धीति घोरं
    यमभटरटितं तद्भूरि दूरीक्रियासम्॥ **17.26** ॥

स्वपदन्यसनेन चारुवर्णा
    सुरवागोष्ठविशुद्धिहेतुभूता।
कमले मम काङ्क्षितानि दुग्धे
    स्तवनार्हा तव नामकामधेनुः॥ **17.27** ॥

तव दिव्यनाम्नि मधुरे निराकृत -
    व्यसने स्थितेऽपि रसनेन्द्रियं मम।
रमते रमे कथमहो रसान्तरे -
    ष्वथ वा तदस्य घटते जडात्मनः॥ **17.28** ॥

त्वन्नामदिव्यकुसुमानि दृढैर्गुणैस्ते
    संग्रथ्य सौरभ विशेष परिष्कृतानि।
आमुञ्चतादिह मदीयसरस्वतीयं
    मातर्महापुरुष मानस रञ्जनाय॥ **17.29** ॥

मन्वन्तराण्यम्ब फलं तनीयः
    तन्वन्ति मन्वन्तरमात्रवर्ति।
आमुष्मिकं शाश्वतमैहिकं वा
    त्वन्नाम किं नाम फलं न दत्ते॥ **17.30** ॥

वर्णत्रयात्मा प्रणवः स्वनिष्ठां
    वर्णत्रयीमेव पुनाति नित्यम्।
एकद्विवर्णाऽपि रमे तवाख्या
    चित्रं पुनीते चतुरोऽपि वर्णान्॥ **17.31** ॥

व्याजादुपात्तमपि वारिधिराजकन्ये
    त्वन्नाम कामपि ददाति मुदां समृद्धिम्।
आपीतमुल्बणतपातप तापशान्त्यै
    दूरीकरोति दुरितान्यपि वारि गाङ्गम्॥ **17.32** ॥

यो वक्ति देवि पदमेकमपि त्वदीयं
    सर्वाणि तस्य हृदि भान्ति सदा पदानि।
नित्योन्नतो नृपतिरेव वशीकृतश्चेत्
    किङ्कुर्वते पुरजना इति कः प्रयत्नः॥ **17.33** ॥

कृपानिधे यम्यधिपाभिधेयं
    वाचो विधेयं तव नामधेयम्।
पद्मालये यस्य गुणोदधेऽयं
    पचेलिमं विन्दति भागधेयम्॥ **17.34** ॥

त्वन्नाथनाम्नः स्वयमुत्तरं सत्
    तवाभिधानं गुणमादधाति।
पद्मेक्षणप्रेयसि निर्विगानं
    प्रमाणमत्र प्रणवं फणामः॥ **17.35** ॥

पद्मे नाम्नां पामरास्तावकानां
    प्रौढिं विद्युर्नैव नामान्तरेभ्यः।
चक्रीवन्तश्चारुकर्पूरचूर्णे
    भस्मभ्यः किं विस्मयं प्राप्नुवन्ति ॥ **17.36** ॥

जहदिह जननि त्वन्नामधेयं विधेयं
    जडमतिरतिरिक्तं शर्मणे कर्म कुर्यात्।
निधिमनवधिमुच्चैर्निष्कुटस्थं विहाय
    प्रतिभवनमशङ्कः पर्यटेद्भिक्षितुं कः ॥ **17.37** ॥

दयोदधे यं तव नामधेया -
    भिधा सुधेयं यदि तां धयेयम्।
न वाजपेयं कमले यजेयं
    न वा जपेयं महतोऽपि मन्त्रान् ॥ **17.38** ॥

शरण वरणमन्त्रे शार्ङ्गिणः प्राणकान्ते
    परमपुरुषनाम्नः प्रागुपादीयमानम्।
विशदमहिम नाम क्षिप्रमेकाक्षरं ते
    वितरति जपतामप्येकमेवाक्षरं तत् ॥ **17.39** ॥

कण्ठे कुण्ठितनिस्वने कफचयैरक्षेषु विक्षेपिषु
    सुप्ते चेतसि यातनाभिरसुषु क्षिप्रं प्रतिष्ठास्नुषु।
सायासाऽपि समुद्रपुत्रि समयाभिज्ञा रसज्ञा मम
    त्वन्नामोपहितं हितं जपतु तद्देवस्य नाम स्वयम् ॥ **17.40** ॥

अभ्यासैः पवमानमन्त्रविततेरब्लिङ्गभङ्ग्यन्तरैः
    आदेशैर घमर्षणस्य यमकैरष्टाक्षरस्येन्दिरे।
गायत्र्याः पुनरुक्तिभिः परिपणैरोङ्कारपुंसूक्तयोः
    शुद्धिं व्याहृतिसोदरैर्न भजते को नाम ते नामभिः ॥ **17.41** ॥

प्रायश्चित्तविशुद्ध्यै
    प्रायश्चित्तं समस्तपापानाम्।
गायतु तव नामैषा
    कमले कलितान्यनिरसना रसना ॥ **17.42** ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे नामवैभवस्तबकः सप्तदशः ॥